National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 161-164
© 2026 NJHSR
www.sanskritarticle.com

रा.महेशः
शोधच्छात्रः, शैवागम विभागः,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः,
तिरुपतिः

Correspondence:
रा.महेशः
शोधच्छात्रः, शैवागम विभागः,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः,
तिरुपतिः

।। कुमारतन्त्राख्य उपागमः ।।

रा.महेशः

आगमं नाम -

शिवेन स्थापितं शैवं शैवेन स्थापितं शिवं, अनेन वाक्येन नाना शास्त्रेषु आगमशास्त्रं शैवमतञ्च अतिप्राचीनं अत्यन्नतोन्नतं इति स्पष्टं भवति । शैवागमाः अष्टाविंशतिः । तथा चोक्तं कारणागमे –

"कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम्।
विजयं चैव निश्वासं स्वायम्भुवमथानलम्।
वीरं च रौरवं चैव मकुटं विमलं तथा।
चन्द्रज्ञानञ्च बिम्बं च प्रोद्गीतं ललितं तथा।
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च।
किरणं वातुळं चैव अष्टाविंशति संख्यया।।"[1]

इत्थं एते अष्टाविंशतिः शिवागमाः –

०१. कामिकम् ०२. योगजम् ०३. चिन्त्यम् ०४. कारणम् ०५.अजितम् ०६.दीप्तम् ०७.सूक्ष्मम् ०८. सहस्रम् ०९.अंशुमान् १०.सुप्रभेदकम् ११.विजयम् १२.निश्वासम् १३.स्वायम्भुवम् १४.अनलम् १५.वीरम् १६.रौरवम् १७.मकुटम् १८.विमलम् १९.चन्द्रज्ञानम् २०.बिम्बम् २१.प्रोद्गीतम् २२.ललितम् २३.सिद्धम् २४.सन्तानम् २५.सर्वोक्तम् २६.पारमेश्वरम् २७.किरणम् २८.वातुलम्

सदाशिवस्य मुखपञ्चकात् अष्टाविंशतिशिवागमाः उत्पन्नाः।

तथा चोक्तं कारणागमे-

कामिकाद्यजितादीश्च सद्योजोत मुखोद्भव ।
दीप्तादिसुप्रभेदान्ता वामदेवमुखे ध्रुवम्।।
विजयारभ्य वीरान्ता पञ्च ते घोरमूर्तये।
रौरवान्तश्च बिम्बान्तं पुंवक्त्रे च समुद्भवम्।।
प्रोद्गीताद्यष्टतन्त्रानि ईशानान सम्भवम्।[2]

शिवस्य पञ्च मुखानि सन्ति।

१. सद्योजातम्, २. वामदेवम्, ३.अघोरम्, ४. तत्पुरुषम्, ५. ईशानम् इति।

एभ्यः पञ्चेभ्यः वक्त्रेभ्यः शिवेन उपर्युक्ता अष्टाविंशतिः शिवागमाः उद्भूताः।

ते च -

१. सद्योजातमुखात् उद्भूताः आगमाः -

१. कामिकम् २.योगजम् ३. चिन्त्यम् ४. कारणम् ५. अजितम्

२. वामदेवमुखात् उद्भूताः आगमाः

१. दीप्तम् २. सूक्ष्मम् ३.सहस्रम् ४. अंशुमान् ५. सुप्रभेदम्

३. अघोरमुखात् उद्धृताः आगमाः

१. विजयम् २. निश्वासम् ३. स्वायम्भुवम् ४. अनलम् ५. वीरम्

४. तत्पुरुषमुखात् उद्भूताः आगमाः

१. रौरवम् २. मकुटम् ३. विमलम् ४. चन्द्रज्ञानम् ५. बिम्बम्

६. ईशानमुखात् उद्भूताः आगमाः

१. प्रोद्गीतम् २. ललितम् ३.सिद्धम् ४. सन्तानम् ५. सर्वोक्तम् ६.पारमेश्वरम् ७.किरणम् ८.वातुलम्

एतेषाम् आगमानाम् उपागमाः सप्ताधिकशतद्वयसङ्ख्याकाः भवन्ति। तेषु द्वाविंशतिः आगमः ललितागमः, अस्य आगमस्य उपागम एव कुमारतन्त्रः ।।

अयि भो विपश्चिदपश्चिमा आगमाभिज्ञाः सज्जनाः ! विज्ञातमेव हि भवतां यत्किल

परमकारुणिको विश्ववन्द्यः सकलकल्याणगुणगणैकनिलयो भगवान् पशुपतिर्लोकाननुजिघृक्षुः स्वयं प्रश्नोत्तरैर्वाक्यैस्तन्त्रापराभिधमागमं समवतारयत्, यच्च

कल्पभेदेन प्रवाहानादिविधयाऽविच्छेदेनानुवर्तमानं प्राचीनार्वाचीन-तन्त्रज्ञपरम्परया

सातिशयं परिपोषितं प्रतिसंस्कृतं प्रचारितं प्रसारितं च सत् चरीवर्ति इति।

आगतं पञ्चवक्त्रात्तु गतं च गिरिजानने
मतं च वासुदेवस्य तस्मादागममुच्यते ॥
गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ।
प्रश्नोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत् ॥

इति महास्वच्छन्दतन्त्रे आगमनिरुक्तिपूर्वकं तन्त्रागमयोरनर्थान्तर-मभ्यधायि। "आसमन्ताद् गमयति, अभेदेन विमृशति पारमेशं स्वरूपमिति कृत्वा परशक्तिरेवागमः, तत्प्रतिपादकस्तु शब्दसन्दर्भ-स्तदुपायत्वात् शास्त्रस्य," इति स्वच्छन्दोद्योते आगमपदस्यार्थं विवृण्वन्, ईश्वरस्वरूपप्रतिपादकशब्दराशिरिति प्रकटीकृतम्। "आगच्छन्ति बुद्धिमारोहन्ति यस्मादभ्युदयनिःश्रेयसोपायाः स आगमः" इति वाचस्पतिमिश्रास्तत्त्ववैशारद्यामवोचन्। इदमागमशास्त्रं नित्यमनादि, वेदमूलत्वात्।

न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते ।
बीजं सर्वागमापाये त्रय्येवादौ व्यवस्थिता ॥

इति वैयाकरणतल्लजभर्तृहरिणा आगमानां प्रवाहानादित्वप्रतिपादनेन नित्यत्वमनुमोदितम्। "तानि पूर्वागमेषु विच्छिन्नेष्वन्येषु प्रणेतृष्वागमान्तरानुसन्धाने बीजवदवतिष्ठन्ते। तान्येव बीजान्यासाद्य पुनः प्रणेतृभिरागमा निबध्यन्ते इति प्रवाहानादित्वं सिद्धमिति नागमा अप्रमाणम्" इति वाक्यपदीयटीकाकारा ग्रन्थकाराशयं विशदीचक्रुः।

पञ्चवक्त्रोद्गतत्वोक्त्या आगमस्य नित्यताया न क्षतिः। श्रीकण्ठाचार्यैः शास्त्रयोनित्वाधिकरणे वेदानामीश्वरप्रणीतत्वेऽपि नित्यत्वस्या-विरुद्धता सुष्ठु उपपादिता, तदिहापि। "प्रलये वेदानां परमेश्वरबुद्धिगोचरतयैवानुवृत्तिः, सर्गादौ तु तेषां परश्रवणगोचरतया वैखरीवृत्तिविशिष्टत्वेन परमेश्वरप्रणीतत्वम्, इत्युभयमप्यविरोधेनोप-पद्यते" इति शिवार्कमणिदीपिकाकारा अप्पय्यदीक्षिता असन्दिग्ध-मभ्यवदन्। नैवम्, "तत्पूर्वपूर्वक्रममनुसरता शम्भुना निर्मितास्ताः साक्षादेव प्रमाणं स हि भवति ततो नैव कस्यापि हानिः" इति नयमणिमालाकारवचनं श्रीकण्ठाशयं विशदयद्विजृम्भते।

"अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिः" इति त्रिपुरभेदनशुल्करूपेण स्वयंवृतपशुपतिकस्य,

अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् ।
आदिकर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः ॥
सद्योजातस्तु ऋग्वेदो वामदेवो यजुः स्मृतः ।
अघोरः सामवेदस्तु पुरुषोऽथर्व उच्यते ।
ईशानश्च सुरश्रेष्ठः सर्वविद्यात्मकः स्मृतः ॥

इत्याद्यार्षेयवचनानुमोदितस्य वेदवेदाङ्गतदुपबृंहणसमस्तविद्यात्म-कस्य जगदवनैकजागरूकस्य परमेश्वरस्य सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशान-मुखपञ्चकनिर्गलित-कामिक- योगज- कारण- प्रसृत-अजित-दीप्त-अंशुमत्-सुप्रभेद-विजय-निःश्वास-स्वायम्भुव-अनल-वीर-रौरव-मुकुट-विमल- चन्द्रज्ञान- बिम्ब- प्रोद्गीत- ललित सिद्ध-सन्तान-किरण-वातुल-सूक्ष्म-सहस्र-सर्वोत्तर-पारमेश्वराभिधानानां ज्ञानविज्ञानात्मक-ऐहिकामुष्मिकाभ्युदयनिःश्रेयसोपायवर्णनपर सदा-शिवाभिन्नविभिन्न देवतोद्देश्य साङ्गोपाङ्गपूजाक्रियाविधिप्रयोग-प्रकाशकात्मकागमप्रभेदानां प्रामाण्ये, को वा सचेताः सन्देग्धि? सदाशिवसमुदीरितानामष्टाविंशत्यागमभेदानां स्वरूपं कामिके तन्त्रान्तरेषु च विस्तरेण प्रतिपादितम्। श्रीमदभिनवगुप्ताचार्यै-स्तन्त्रालोके शैवागमस्याष्टाविंशतिप्रभेदत्वमुल्लिखितम्—

"दशाष्टादशवस्वष्टभिन्नं यच्छासनं विभोः" इति ॥

सर्वतन्त्रस्वतन्त्रैः श्रीमदप्पय्यदीक्षितैः शिवार्चनचन्द्रिकायाम्—

स्रोतस्युर्ध्वे भवेज्ज्ञानं शिवरुद्राभिधं द्विधा ।
कामिकं योगजं चिन्त्यं मकुटं चांशुमत्पुनः ॥
अष्टाविंशतिरित्येवमूर्ध्वस्रोतोविनिर्गताः॥
इत्यादिना शैवागमस्याष्टाविंशतिभेदा विवृताः।

श्रीमद्भिर्भास्कराचार्यैः सौभाग्यभास्करे त्रिपुरसुन्दरीवर्णनव्याजेन कामिकप्रभेदानामागमानां नामनिर्देशः कृतः—

कामिकं पादकमलं योगजं गुल्फयोर्युगम् ।
पादद्वयाङ्गुलीरूपे कारणं दीप्तमेव च ॥
अजितं जानुनोर्युग्मं सूक्ष्ममूरुद्वयं विभोः ।
पृष्ठभागोंशुमानस्य नाभिः स्यात्सुप्रभेदकम् ॥
विजयं जठरं प्राहुर्निःश्वासं हृदयात्मकम् ।
स्वायम्भुवं स्तनद्वन्द्वमनलं लोचनत्रयम् ॥
वीरागमः कण्ठदेशो रौरवं श्रुतिद्वयम् ।
मकुटं मूर्ध्नि तन्त्रं स्याद्वाहवो विमलागमः ॥
चन्द्रज्ञानमुरः प्रोक्तं बिम्बं वदनपङ्कजम् ।
प्रोद्गीततन्त्रं रसना ललितं गण्डयोर्युगम् ॥
सिद्धं ललाटफलकं सन्तानं कुण्डलद्वयम् ।

किरणं रत्नभूषा स्याद्वातुलं वसनात्मकम् ॥
अङ्गोपाङ्गानि रोमाणि तन्त्राण्यन्यानि कृत्स्नशः ।
एवं तन्त्रात्मकं रूपं महादेव्या विचिन्तयेत् ॥ इति।

अष्टाविंशत्यागमान्यतमललितागमान्तर्गतं प्रकृतं कौमारं तन्त्रम्। ललितागमस्य "ललितं ललितान्तरं कौमारम्" इति त्रयो भेदा उक्ताः। ईश्वरः स्वविद्यागुरोः कुमारस्य पूजाक्रियाविधिप्रतिपादकं तन्त्रं साञ्जलिबन्धं पृष्टवते कौशिकायोपदिदेश। तन्त्रेऽस्मिन्नुक्तम्—

ईश्वर उवाच—

यत्त्वया चोदितं तन्त्रं तत्प्रवक्ष्यामि कौशिक ।
कुमारतन्त्रमधुना नित्यं नैमित्तिकं ततः ॥ इति।

कामिके आगमोत्पत्तौ, उत्तरकामिके गोत्रनिर्णयपटले, कारणे प्रश्नपटले च कुमारतन्त्रोल्लेखः कृतः।

"मन्त्रभेदो भवेद् अत्र क्रियाभेदो न विद्यते ।
अष्टाविंशतितन्त्रेष्वप्यनुक्तं सङ्ग्रहेद् बुधः" ॥

इति प्रश्नपटलान्त्यवचनाद् ज्ञायते कुमारपूजाक्रियाविधिप्रतिपाद-केष्वगमान्तरेष्वनुक्ता विशेषविधय एवात्र सङ्गृहीता इति।

तन्त्रमिदं प्रश्न-मन्त्रोद्धार-शौच-आचमन-स्नान-अनुष्ठान-नित्यपूजा-नैवेद्य-अग्निकार्य-नित्योत्सव-कुण्डलक्षण-मण्डल-गुहदीक्षा-स्नपन-स्कन्दोत्सब-प्रायश्चित्ताद्येक पञ्चाशत्पटलविभक्तं कुमारस्य पूजाक्रियाविधिमुपदिशति।

इदञ्च तन्त्रं ग्रन्थलिप्यां मुद्रितपूर्वमपि इदानीमप्राप्यं वर्तते। ग्रन्थलिपिमुद्रणादौत्तराणां तान्त्रिकाणामप्रवेशं पर्यालोच्य, देवनाग-रीलिप्यां मुद्रणाय प्रयत्न आदृतः। तन्त्रमिदं प्राचीनं तालपत्रलिखितं ग्रन्थलिप्यामेकं, कागजलिखितं आन्ध्रलिप्यामेकं, ग्रन्थलिप्यां मुद्रितमेकं इति आहत्य ग्रन्थत्रयेण संवाद्य संशोध्य अपेक्षितपाठभेदपुरस्सरं देवनागरीलिप्यां मुद्रितं भवत्समक्षमुप-हारीकृतम् ।

जीर्णालयोद्धरणधर्मतोऽपि गरीयस्यत्र विलुप्तप्रबन्धपुनरुज्जीवने श्रमसाध्ये व्यवसाये प्रवृत्तानां वार्द्धक्यमप्यनादृत्य अविरतोद्यमानां दाक्षिणात्यार्चकसङ्घसञ्चालकानां श्रीस्वामिनाथशिवाचार्याणां महीयानयं संरम्भः आगमिकानामभिज्ञानां प्रशंसापात्रतामावहति।

कोशसंवादे, संशोधने, पाठभेदनिर्णये च सोत्सुकावधानाः मम सुहृदः श्रीमत्परमेश्वरनामानः आगमिकैर्नूनं बहुमानार्हाः। अत्यन्तजागरूक-तयैतद्ग्रन्थसम्पादने कृतपरिश्रमाणां श्रीकन्दस्वामिशिवाचार्याणा-मायोऽयमुद्योगः स्तुत्यो विद्वदादरणीयश्च। इदं ग्रन्थरत्नं तत्र तत्र अपेक्षितानां मन्त्रभागानां विवरणपुरस्सरं, आगमान्तरसंवादसहितं प्रयोगविशेषाणां विवेचनपूर्वकं मुद्रालक्ष्यनिर्देशेन साकं सम्मुद्र्य प्रकाशयितव्यमिति सङ्कल्पितमासीत्। किन्तु 'श्रेयांसि बहुविघ्नानि' इति रीत्या पदे पदे विघ्नबाहुल्याद् आगमिकानामाकाङ्क्षापूर्ति मनसि निधाय प्रकाशने अविलम्ब आदृतः। यथासङ्कल्पितं चेदं तन्त्रं प्रकाशमेष्यतीति विश्वसिमि।

अथ प्रथमपटले भगवान् सदाशिवः कैलासशिखरे उपविष्टः सन् परमकारुणिकतया जगदुद्धारार्थं कौशिकाय महर्षये कौमारतन्त्रस्य रहस्यं प्रकटीकरोति। कौशिकमुनिः साञ्जलिबन्धं कृत्वा विनयपुरस्सरं पशुपतिं पृच्छति— "हे देवदेवेश, जगन्नाथ, कुमारस्य परात्मनः सर्वसिद्धिप्रदां पूजाविधिं मन्त्ररहस्यं च वक्तुमर्हसि" इति।

द्वितीयपटले मन्त्राणां शक्तेः, तेषां उद्धारक्रमस्य च निरूपणमस्ति। भगवान् शिवः कथयति यत् मन्त्राधीना हि देवता भवति। तत्र मुख्यरूपेण कुमारस्य सद्योजात-वामदेवादि-मुखेभ्यः निर्गतानां मन्त्राणां बीजाक्षराणि यथा— 'ॐ सं स्कन्दाय नमः' अथवा 'शरवणभव' इति प्रसिद्धषडक्षरमन्त्रस्य सांकेतिकरहस्यं, न्यासविधिं च निरूपयति। बीजाक्षराणां ऋषि-छन्द-देवता-कीलकानां ध्यानं, कराङ्गन्यासः, हृदयविन्यासश्च अस्मिन् पटले विशदतया विवृताः सन्ति, येन साधकस्य मन्त्रसिद्धिः सुलभा भवति।

तृतीयपटले तान्त्रिकसाधनार्थं शरीरस्य मनसश्च शुद्धिः कथं करणीया इति शौचविधिः उपदिष्टः। ब्राह्ममुहूर्ते उत्थाय शौचक्रिया, दन्तधावनविधिः, मृत्तिकाजलविशिष्टशौचप्रकाराः च अत्र वर्णिताः। तान्त्रिकार्चने बाह्यशौचेन सह आन्तरिकभावशुद्धिः अपि समानाधिक्त्वेन स्वीक्रियते। यः साधकः शौचविहीनः, तस्य सर्व क्रिया निष्फला भवति इति शिववचनेन प्रतिपादितमस्ति।

चतुर्थपटले आचमनस्य शास्त्रीयविधिः प्रतिपादितः। तान्त्रिकक्रियासु कर्मारम्भात् पूर्वं, शौचानन्तरं च त्रिराचमनं करणीयम्। तत्र कनिष्ठिका-अङ्गुष्ठादि-अङ्गुलीनां प्रयोगः, दक्षिणहस्तेन तोयपान-विधिः, मुख-नेत्र-श्रोत्रादि-इन्द्रियाणां स्पशेन सह पठनीयाः मन्त्राः विवृताः। इदं आचमनं शरीरस्य नाडीमण्डलं शुद्धं करोति, मनसः एकाग्रतां च जनयति।

पञ्चमपटले स्नानस्य महत्त्वं तस्य विविधभेदाश्च निरूपिताः। वारुणं, आग्नेयं, वायव्यं, दिव्यं, मानसं च इति स्नानस्य पञ्चप्रकाराः वर्णिताः। तान्त्रिकार्चने विशेषतः मन्त्रपूरितेन जलेन क्रियमाणं 'वारुणस्नानम्' तथा भस्मना क्रियमाणं 'पाशुपतस्नानम्' (आग्नेयम्) कुमारभक्तानां प्रशस्तं भवति। स्नानावसरे स्कन्दसूक्तस्य, अघोरमन्त्रस्य वा पठनं करणीयम् इति विशेषनियमः अत्र दृश्यते।

षष्ठपटले साधकस्य नित्यकर्मानुष्ठानविधिः वर्णितः। प्रात-र्मध्याह्न-सायंसन्ध्यासु कर्तव्यानि कर्माणि, गायत्रीमन्त्रजपक्रमः, पितृ-देव-ऋषितर्पणविधिः च अत्र विवृताः। प्राणायामस्य रेचक-पूरक-कुम्भकलक्षणानि, नाडीशोधनप्रक्रिया च तान्त्रिकदृष्ट्या कथं करणीया इति अस्मिन् पटले सम्यक् उपपादितं वर्तते।

सप्तमपटले कुमारस्य मुख्यगृहपूजा वा देवालयपूजाविधिः आरभ्यते। आवाहनादि-षोडशोपचारपूजा (आसन, पाद्य, अर्घ्य, स्नान, वस्त्र, गन्ध, पुष्पादिकाः) कथं कार्या इति विवृत्तम्। भगवतः षण्मुखस्य

द्वादशहस्तयुगलं, मयूरवाहनं, शक्ति-कुक्कुटध्वजादि-आयुधोपेतं ध्यानं कृत्वा करणीया आवरणपूजा अस्मिन् पटले मुख्यतया प्रतिपादिता अस्ति।

अष्टमपटले भगवते कार्तिकेयाय समर्पणीयानां भक्ष्याणां नैवेद्यानां च लक्षणानि उक्तानि। शाल्यन्नं, मुद्गान्नं, पायसं, लाजाः, कदलीफलानि, नारिकेलजलं, विशेषतः गुडेन निर्मितं मधुपर्कं च कुमाराय अतीव प्रियम्। एतेषां पदार्थानां शुद्धिः, मन्त्रेण धेनुमुद्रया च अमृतीकरणं, ततः समर्पणविधिः अस्मिन् पटले विस्तरेण विवृताः।

नवमपटले अग्निकार्यं निरूपितम्। शिवोद्भवस्याग्नेः संस्कारः, कुण्डे तस्य प्रतिष्ठा, घृताहुतिः, समिदाहुतिश्च (पलश-अश्वत्थादिसमिद्भिः) कथं करणीया इति अत्र वर्णितम्। अग्नौ कुमारस्य रूपं ध्यात्वा हविःप्रदानं क्रियते, येन साधकस्य ऐहिकामुष्मिकफलसिद्धिः, रोगनिवारणं च भवति।

दशमपटले देवालयेषु आयोज्यमानानां नित्य-नैमित्तिकोत्सवानां लक्षणं प्राधान्यं च विवृत्तम्। ध्वजारोहणमारभ्य अवभृथस्नान (तीर्थवारि) पर्यन्तं कर्तव्याः क्रियाः अत्र वर्णिताः। लोककल्याणार्थं, राज्ञः विजयार्थं, दुर्भिक्षनिवारणार्थं च उत्सवः अनिवार्यः इति अस्मिन् पटले प्रतिपादितम्।

एकादशपटले कुण्डानां निर्माणकला वर्णिता। चतुरस्र-वृत्त-अर्धचन्द्रादि-आकाराणां कुण्डानां प्रमाणं, मेखलानां (त्रिमेखला वा द्विमेखला) रचना, योनिलक्षणं च अत्र सूक्ष्मद्रष्ट्या विवृत्तम्। भिन्न-भिन्न-काम्यसिद्धीनां कृते भिन्न-आकारयुक्तानि कुण्डानि प्रयोज्यानि इति अत्र शास्त्रीयनियमः।

द्वादशपटले पूजाङ्गभूतनां मण्डलानां निर्माणक्रमः प्रतिपादितः। रजःपञ्चकेन (श्वेत-रक्त-पीत-कृष्ण-हरित-चूर्णैः) पद्ममण्डलादीनां रेखाङ्कनविधिः, तत्र देवतानां आवाहनस्थानं च वर्णितम्। मण्डले पूजितः कुमारः शीघ्रमेव साधकाय प्रत्यक्षो भवति इति विश्वासः।

त्रयोदशपटले कुमारसम्प्रदायान्तर्गता 'गुहदीक्षा' निरूपिता। समय-विशेष-निर्वाणादिदीक्षाणां क्रमः, शिष्यस्य परीक्षा, आचार्येण मन्त्रोपदेशकाले कर्तव्याः क्रियाश्च अत्र वर्णिताः। दीक्षया विना तान्त्रिकमार्गे कस्यापि अधिकारो न भवति इति सिद्धान्तः अत्र दृढीकृतः।

चतुर्दशपटले भगवतः कुमारस्य विशेषमूर्तेः कलशाभिषेक (स्नपन) विधिः वर्णितः। पञ्चविंशति पञ्चाशत् अष्टोत्तर शतं २५, ५०, १०८ वा कलश स्थापनं कृत्वा, तेषु जलेषु औषधीनां, रत्नानां, सुगन्धिद्रव्याणां च निक्षेपः, ततः मन्त्रपूर्वकमभिषेकः कथं करणीयः इति अत्र सांगोपांगं विवृत्तम्।

पञ्चदशपटले विशेषतः 'स्कन्दोत्सवपटलः स्कन्दषष्ठी' अथवा 'कृत्तिकामहोत्सवस्य' तान्त्रिकपद्धतिः वर्णितः। अस्मिन् दिने रथोत्सवः, मयूरवाहने देवस्य नगरप्रदक्षिणा, दीपारोपणं, दरिद्र-नारायणभोजनं च करणीयम्। अनेन नगरे शान्तिः, महामारीनिवारणं च भवति।

षोडशपटले मानवसहजभूलवशात् अथवा द्रव्याणामभावात् पूजासु याः त्रुटयः (लोपाः) भवन्ति, तेषां निवारणार्थं प्रायश्चित्तविधिः उतः। अत्र विशेषहोमाः, महाभिषेकाः, सहस्रनामजपाः च प्रायश्चित्तरूपेण विहिताः, येन कर्मसाद्गुण्यं भवति, देवकोपश्च नश्यति।

श्रीमत्कुमारतन्त्रस्य प्रतिपाद्यविषयसङ्ग्रहः

कैलासशिखरासीनेन साक्षात् परमेस्वरेण सदाशिवेन स्वात्मजस्य षण्मुखस्य पूजाक्रियाविधिप्रतिपादनपरमिदं शास्त्रं महर्षये कौशिकाय उपदिष्टम्। अस्य तन्त्रस्य मूलप्रतिपाद्यो विषयः द्विधा विभक्तुं शक्यते— ज्ञानभागः क्रियाभागश्च इति।

तत्रादौ ज्ञानभागे कार्तिकेयस्य परात्मस्वरूपत्वं, तस्य पञ्चवक्त्रोद्भूत्वं, वेदवेदाङ्गमूलकत्वं च दृढं संस्थापितम्। भगवतः स्कन्दस्य मुख्यमन्त्राणां, विशेषतः शरवणभवेति प्रसिद्धस्य षडक्षरमन्त्रस्य सांकेतिकरहस्यं, बीजाक्षरोद्धारक्रमः, कराङ्गन्यासादयश्च साधकस्य मन्त्रसिद्धिप्रदत्वेन निरूपिताः सन्ति। साधकस्य बाह्याभ्यन्तरशुद्धये शौच-आचमन-स्नान-नित्यानुष्ठानविधयः मन्त्रसहिताः उपदिष्टाः, यैः विना तान्त्रिकार्चनं निष्फलं भवति।

अस्य शास्त्रस्य बृहत्तमो भागः क्रियाविधीनधिकरोति। तत्र देवालयपूजार्थं पीठार्चनम्, आवरणपूजा, षोढशोपचारसमर्पणविधिः, नैवेद्यामृतीकरणप्रक्रिया च सूक्ष्मतया वर्णिता। तान्त्रिकयज्ञाङ्गत्वेन यागशालायाः निर्माणम्, एकादशप्रकारकाणां हवनकुण्डानां मेखला-योनिसहितं रेखामानलक्षणं, रजःपञ्चकेन पद्ममण्डलादीनां रचना, कलशाधिवासनक्रमश्च विस्तरेण विवृतः। देवालयेषु विग्रहाणां स्थायित्वार्थं शूलस्थापनम्, रज्जुबन्धनम्, अष्टद्रव्यैः अष्टबन्धन-लेपनविधिः, अक्ष्युन्मीलनं (नेत्रोन्मीलनप्रक्रिया) च उपदिष्टाः। स्कन्दवाहनस्य मयूरस्य विग्रहरचना, नादस्वरूपस्य कुक्कुटस्य ध्वजलक्षणं, मुख्यप्रहरणस्य शक्त्यायुधस्य (वेल) निर्माणमानं च शास्त्रीयदृष्ट्या निरूपितम्।

उत्सवाधिकारमधिकृत्य ध्वजारोहणमारभ्य, चूर्णोत्सव-तीर्थस्नान (अवभृथ)-ध्वजावरोहण-शयनोत्सवान्तं नित्य-नैमित्तिक-काम्योत्स-वानां प्रयोगः सांगोपांगं वर्णितः। मानवसहजदोषवशात् पूजासु उत्सवेषु च सम्भावितानां त्रुटीनां शमनाय पवित्रारोहण-दमनकोत्सवादि-विशेषप्रायश्चित्तविधयः शन्तिहोमाश्च विहिताः।

अन्ते साधकानां मुमुक्षूणां च पाशविमोचनपूर्वकं मोक्षप्राप्तये समय-विशेष-निर्वाणदीक्षाणां क्रमः, गुरूपदप्रतिष्ठापको आचार्याभिषेक-विधिश्च निरूपितः। यथोक्तविधिना कुमारं यजमानः साधकः इहलोके ऐहिकामुष्मिकसुखानि भुक्त्वा अन्ते कार्तिकेयस्य सायुज्यमुक्तिं प्राप्नोतीति शास्त्रस्य परमलक्ष्यं भवति ।

इत्यादि विषयान्तर्गत उन्नत शास्त्रं सामाजिक उपयोगाय उद्धारनं भवितव्यं इति अस्य उपागमस्य पाठसंपादनं भवति ।।

सन्दर्भ ग्रन्थः

[1]पूर्वकारणागमः-तन्त्रावतारपटलः श्लोकाः ८ - ११।

[2]उत्तरकारणागमः तन्त्रावतारपटलः श्लोकाः ८१ ८३।